No. ६८८ · घ

Title सिद्धान्तविन्दुस्तोत्रम्

Author श्रीशंकराचार्यः

Extent १ Age

Subject वेदान्तशास्त्रम् · सम्पूर्णम्

१५३

नं० ६८८-घ

# सिद्धांतबिन्दुस्तोत्रम्

पत्राम् १ (एकम्) (सम्पूर्णम्)

नं० ६८८-घ

कर्त्ता श्रीमच्छंकराचार्यः

ॐ श्रीगणेशाय नमः॥ ॐ न भूमिर्न तोयं न तेजो न वायुर्न खं नेंद्रियं वा न तेषां समूहः॥ अनैकांतिकत्वात्सुषुप्त्येकसिद्धि
स्तदेकोवशिष्टः शिवः केवलोहं॥ १॥ न वर्णा न वर्णाश्रमाचारधर्मा न मे धारणाध्यानयोगादयोपि॥ अनात्मा
श्रयाहंममाध्यासहानां॥ तदेकोवशि॥ २॥ न माता पिता वा न देवा न लोका न वेदा न यज्ञा न तीर्थं ब्रुवंति॥ सुषु
प्तै निरस्तातिशून्यात्मकत्वा॥ तदेकोवशि॥ ३॥ न सांख्यं न शैवं न तत्पांचरात्रं न जैनं न मीमांसकादेर्मतं वा॥ विशिष्टानु
भूत्या विशुद्धात्मकत्वा॥ तदेकोवशि॥ ४॥ न चोर्ध्वं न चाधो न चांतर्न बाह्यं न मध्यं न तिर्यङ् न पूर्वापरा दिक्॥ विय
द्व्यापकत्वादखंडैकरूपं॥ तदेकोवशि॥ ५॥ न शुक्लं न कृष्णं न रक्तं न पीतं न कुब्जं न पीनं न ह्रस्वं न दीर्घं॥ अरूपं त
था ज्योतिराकारकत्वा॥ तदेकोव॥ ६॥ न शास्ता न शास्त्रं न शिष्यो न शिक्षा न च त्वं न चाहं न चायं प्रपंचः॥ स्वरू
पावबोधो विकल्पासहिष्णु॥ तदेकोवशि॥ ७॥ न जाग्रन्न मे स्वप्नको वा सुषुप्तिर्न विश्वो न वा तैजसः प्राज्ञको वा॥
अविद्यात्मकत्वात्त्रयाणां तुरीयं॥ तदेकोव॥ ८॥ अपि व्यापकत्वाद्धितत्वप्रयोगात् स्वतःसिद्धभावादनन्याश्रय

सि· १

त्वात् ॥ जगत्कृत्स्नमेतत्समस्तं तदन्यस्तदेकोवशिष्टः शिवः केवलोहं ॥ ९ ॥ न चैकं तदन्यद्द्वितीयं कुतः स्यात्न वा केव

लत्वं न चाकेवलत्वं ॥ न शून्यं न चाशून्यमद्वैतकत्वात्कथं सर्ववेदांतसिद्धं ब्रवीमि ॥ १० ॥ इति श्रीशंकराचार्यविरचि

तं सिद्धांतबिंदुस्तोत्रं संपूर्णम् ॥ शुभमस्तु ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ॐ १